MANĪṢĀ - *A Research Journal of Sanskrit* ISSN : 2583-2271
Vol. - I, No. 1: 2021

# आचार्यरघुनाथदिशा पदार्थतत्त्वसमीक्षणम्

**दीपकगराइ**

## प्रबन्धसारः

*पदार्थस्वीकारे विप्रतिपत्तिर्दृश्यते न्यायवैशेषिकविदुषां मतेषु। तत्र नव्यनैयायिकप्रवराचार्यरघुनाथशिरोमणिस्तु तत्कृतपदार्थतत्त्वनिरूपणग्रन्थे स्ववैदुष्यवैदुर्यप्रभया विप्रतिपन्नमतानि स्पष्टत उल्लिख्य प्राचीनाभ्युपेतपदार्थानां कस्यचितनतिरिक्तत्वं कस्यचित् खण्डनं कस्यचिदतिरिक्तत्वं तर्केण युक्त्या वा व्यवस्थापितम्। प्राग्रघुनाथाचार्यैर्ये पदार्थाः स्वीकृतास्तेषु युक्तिवादिना रघुनाथेन ये पदार्थाः युक्तिसिद्धास्त एव पदार्थाः सिद्धान्तरूपेणोररीकृताः, ये च प्राचीनतन्त्रसिद्धाः किन्तु आचार्यरघुनाथसिद्धान्तानुगुण-प्रतिकूलयुक्तिसमन्वितास्तान् पदार्थान् खण्डयित्वा युक्तिं प्रदर्श्य स्वतन्त्रं प्रतिष्ठापितम्।*

*कुत्रचिच्च, न्यायवैशेषिकतन्त्रासिद्धमीमांसकतन्त्रसिद्धपदार्थास्तथा सिद्धान्ता वा तेनाङ्गीकृताः। यथा पूर्वाचार्यतन्त्रसिद्धास्तथा न्यायवैशेषिकैः पृथक्पदार्थत्वेन प्रसिद्धाः दिक्कालादय आचार्यरघुनाथेन विविधयुक्त्या ईश्वरेऽन्तरीकृतास्तथा न्यायवैशेषिकतन्त्रविरुद्धाः शक्ति-स्वत्व-क्षणप्रभृत्यतिरिक्तपदार्थास्तेनाङ्गीकृताः। दीधितिकारस्तार्किकशिरोमणिराचार्य-रघुनाथस्तु दिक्कालयोः पृथक्पदार्थत्वं नाङ्गीकुरुते। पदार्थसूक्ष्मेक्षणपारङ्गमरघुनाथस्तु तयोः पृथक्पदार्थत्वस्य विविधयक्त्या खण्डनमकार्षीत्। तन्मते तु दिक्कालौ हि ईश्वराभिन्नपदार्थविशेषौ तेन तु नानयुक्तिभिर्दिश ईश्वरेऽन्तर्भावः कृतः।*

*एवं बहुत्रैव पदार्थतत्त्वविषये आचार्यरघुनाथस्य पृथक् तत्त्वमुपभ्यते। यद्युच्यते आचार्यरघुनाथस्य 'पदार्थतत्त्वनिरूपणम्' इत्यादिबहवो ग्रन्थाः समुपलभ्यन्ते, तेभ्य एव तद्दिशा पदार्थतत्त्वं ज्ञातुं शक्यते तर्हि कथं पुनः व्याख्याने प्रवृत्तिरिति पृष्टस्य पेषणं मृतस्य मरणं यथा इति चेन्न, तत्र पर्यालोचन◌ं यद्यपि दृश्यते किन्तु विस्तारितमालोचनं न दृश्यते तथा न्यायवैशेषिकस्वीकृतपदार्थेभ्यः रघुनाथस्वीकृतपदार्थानां स्वीकारे को लाभः, स्वीकारे का युक्तिः, सा समीचीना न वेति इत्यादिविषये समीक्षणात्मकप्रबन्धो नोपभ्यते। अत◌ः विस्तरशः समीक्षात्मकप्रबन्धं प्रतिपादयितुं ममैष प्रयासः। किञ्च, भविष्यति गवेषकाणां कृतेऽपि मत्प्रबन्धपत्रं सहायकं भवेदिति मन्ये।*

## उपोद्घातः

यद्यपि दर्शनस्य कापि निर्दिष्टसंज्ञा नास्ति तथापि व्युत्पत्त्या दर्शनशास्त्रमभिव्यनक्ति केचित्। तथाहि दृश्यते साक्षात्क्रियते परमात्मादिसंज्ञासंज्ञितः परमपुरुषो येन तद्दर्शनमिति। तेनानया व्युत्पत्त्या एव लभ्यते यद्दर्शनशास्त्रमिदं (चार्वाकदर्शनं व्यतिरिच्य) मूलं परमतत्त्वं परमं चरमं श्रेष्ठं वा पुरुषार्थं प्रापयति। लब्धे परमतत्त्वे दुःखानाम् आत्यन्तिकनिवृत्तिर्भवति। (परमतत्त्वमिदं निःश्रेयसमोक्षापवर्गादि- नाम्नापि प्रथितम्) तथाहि विषयेऽस्मिन् श्रुतिरेव मानं "**दुःखेनात्यन्तं विमुक्तश्चरति**" इति।

परन्तु दुःखानामात्यन्तिकनिवृत्तिः कथं सम्भवेदिति पृच्छायां तु विविधदर्शनेषु विविधोपाय उपवर्णितः। न्यायवैशेषिकनये तु पदार्थतत्त्वज्ञानादेव तत्सम्भवेत्।

परन्तु पदार्थस्वीकारे विप्रतिपत्तिर्दृश्यते न्यायवैशेषिकविदुषां मतेषु। तत्र नव्यनैयायिकप्रवराचार्यरघुनाथशिरोमणिस्तु तत्कृतपदार्थतत्त्वनिरूपणग्रन्थे स्ववैदुष्य-वैदुर्यप्रभया विप्रतिपन्नमतानि स्पष्टत उल्लिख्य प्राचीनाभ्युपेतपदार्थानां कस्यचिदनतिरिक्तत्वं कस्यचित् खण्डनं कस्यचिदतिरिक्तत्वं तर्केण युक्त्या वा व्यवस्थापितम्। प्राग्रघुनाथाचार्यैर्ये पदार्थाः स्वीकृतास्तेषु युक्तिवादिना रघुनाथेन ये पदार्थाः युक्तिसिद्धास्त एव पदार्थाः सिद्धान्तरूपेणोररीकृताः, ये च प्राचीनतन्त्रसिद्धाः किन्तु आचार्यरघुनाथ-सिद्धान्तानुगुणप्रतिकूलयुक्तिसमन्वितास्तान् पदार्थान् खण्डयित्वा युक्तिं प्रदर्श्य स्वतन्त्रं प्रतिष्ठापितम्। तथाह्युच्यते तेन दीधित्यां—

"विदुषां निवहैरिहैकमत्याद् यददुष्टं निरटङ्कि यच्च दुष्टम्।
मयि जल्पति कल्पनाधिनाथे रघुनाथे मनुतां तदन्यथैव॥"[1] इति।

कुत्रचिच्च, न्यायवैशेषिकतन्त्रासिद्धमीमांसकतन्त्रसिद्धपदार्थास्तथा सिद्धान्ता वा तेनाङ्गीकृताः। यथा पूर्वाचार्यतन्त्रसिद्धास्तथा न्यायवैशेषिकैः पृथक्पदार्थत्वेन प्रसिद्धाः दिक्कालादय आचार्यरघुनाथेन विविधयुक्त्या ईश्वरेऽन्तरीकृतास्तथा न्यायवैशेषिकतन्त्र- विरुद्धाः शक्ति-स्वत्व-क्षणप्रभृत्यतिरिक्तपदार्था◌ः तेनाङ्गीकृताः। दीधितिकारस्तार्किकशिरोमणि◌ः आचार्यरघुनाथस्तु दिक्कालयोः पृथक्पदार्थत्वं नाङ्गीकुरुते। पदार्थसूक्ष्मेक्षणपारङ्गमरघुनाथस्तु तयोः पृथक्पदार्थत्वस्य विविधय◌ुक्त्या खण्डनमकार्षीत्। तन्मते तु दिक्कालौ हि ईश्वराभिन्नपदार्थविशेषौ तेन तु नान◌ायुक्तिभिर्दिश ईश्वरेऽन्तर्भावः कृतः। तन्मतं विस्तरशो निगद्यतेऽधस्तात्।

### दिक्कालयोरीश्वरेऽन्तर्भावः

सांख्यशास्त्रे योगशास्त्रे चापि महादिक् महाकालः इत्येवमखण्डतया कालस्य दिशो वा ग्रहणं न कृतम्। तत्र सांख्यतत्त्वकौमुद्यामाचार्यवाचस्पतिमहोदयेन अगादि—

"कालश्च वैशेषिकाभिमत एको नानागतादिव्यवहारभेदं प्रवर्तयितुमर्हतीति, तस्मादयं यैरुपाधिभेदैरनागतादिभेदं प्रतिपद्यते, सन्न त एवोपाधयः, येऽनागतादिव्यवहार- हेतवः, कृतमत्रान्तर्गडुना कालेनेति सांख्याचार्याः"[2] इति।

**अत्रायमाशयः-** वैशेषिकतन्त्रसिद्धाखण्डै-कमात्रेण महाकालेन महादिशा वातीतादेर्व्यवहारो हि न सम्भवति। अतः खण्डितकालोपाधिः खण्डितदिगुपाधिस्तै◌ः अवश्यमेव स्वीकार्यः

1 तत्त्वचिन्तामणिदीधितिः
2 सांख्यतत्त्वकौमुदी,नारायणचन्द्रगोस्वामी

इति। तथा च, तन्निखिलदिगुपाधिभिः तन्निखिलकालो-पाधिभिरेव यतो हि प्राच्यादिव्यवहारक्षणादि-व्यवहारोपपत्तेर्नास्ति महादिग्रूप-महाकालरूप-पृथक्पदार्थान्तरस्वीकारेणेति सांख्याः।

योगशास्त्रे च "स पूर्वेषामपि गुरुः कालेनानवच्छेदात्" इति योगसूत्रादवगम्यते यदीश्वरो न हि कालेनावच्छिन्नः। तेन स्पष्टत एव प्रतीयते कालपदेन खण्डकालस्यैव ग्रहणं कृतम्। यतो हि परिछिन्नवस्तु एव अवच्छेदकमुपाधिर्वा भवति, न तु विभुपदार्थः। तेन योगशास्त्रकारेणापि खण्डकालोऽङ्गीकृतः। तदनङ्गीकृते तु इदानीं घटः , तदानीं घटः, भावी घटः इति व्यवहारोऽप्यसम्भवः इति चानिष्टापत्तिः। एवं दिग्विषयेऽप्यूह्यम्। यतो हि पदार्थस्वीकारे तत्प्रतीतिः (अनुभवः) तद्व्यवहार एव मानदण्डरूपः।

एवं वस्तुतः सांख्ययोगादिदर्शनैः प्रभावितः सन्नाचार्यरघुनाथशिरोमणिः महाकालस्य महादिशश्च खण्डनमकरोत्। यतो न्यायशास्त्रे विशेषतो नव्यन्याये पदार्थस्वीकारे तदनुभवस्तज्जन्यव्यवहारश्च प्रमाणनिदानम्। आचार्यशङ्करमिश्रेणापि वैशेषिकसूत्रोपस्कारे केवलं सम्बित् अनुभवो वा पदार्थस्वीकृतौ नियामकः इत्युक्तम्।

दिक्कालावाश्रित्यास्माकं योऽनुभवो व्यवहारो वा भवति तत्तु दिगुपाधिस्वरूपखण्डदिशमाश्रित्य तथा कालोपाधिस्वरूपखण्डकालमाश्रित्यैव भवति। अखण्डं महाकालं महादिशमाश्रित्य तु न किमप्यस्माभिरनुभूयते व्यवह्रियते च। सिद्धान्तलक्षणे जगदीशतर्कालङ्कारेणापि 'इदानीम्' 'तदानीम्' इत्येवं प्रतीतिरूपेण खण्डकालं व्यतिरिच्य महाकालो महादिग् वा न हि अस्मदनुभवसिद्ध इत्यगादि। तथाहि तेनोक्तम् "इदानीं महाकालान्यत्वविशिष्टो घटः, कालोऽयं महाकालान्यत्वविशिष्टघटवान् इत्यादिप्रतीत्या महाकालस्यापि तत्तत्कालोपाध्यवच्छेदेन महाकालान्य-त्वविशिष्टघटवत्त्वात्, अन्यथोक्त-प्रतीत्या खण्डकाल एव विशिष्टघटवत्त्वावगाहने वस्तुमात्रस्यैव महाकालेऽसत्त्वप्रसङ्गाद् इदानीं तदानीमित्यादिप्रतीतिव्यतिरेकेण महाकाल-विषयिण्याः प्रतीतेः स्वरसतः कुत्रापि असत्त्वात्, न चैवं खण्डकालस्याधिकरणत्वे मानाभावः पटध्वंसविशिष्टकालः पटवदन्य इत्यादिप्रतीतेः प्रमात्वानुरोधेनैव खण्डकालस्यापि तथात्वादिति सिद्धान्तानुसारिपन्थाः।"[3] इति।

अत एव स्वातन्त्र्येण महाकालमहादिग्गोचरीभूतप्रतीतिव्यवहारयोरभावात् पृथिव्यादिवत् महादिक् महाकालो न हि अतिरिक्तपदार्थविशेषः इति रघुनाथशिरोमणेरभिप्रायः। किञ्च, यदि 'इदानीम्' 'तदानीम्' इत्यादिप्रतीतिविषयः खण्डकालो महाकालरूपेण स्वीक्रियते चेत्तदा 'इदानीं घटोऽस्ति' 'तदानीं घटो नासीत्' इति प्रतीतिर्नोपपद्येत, इदानीमपदवाच्यमहाकाले घटस्य वर्तमानत्वात् तदानीम्पदवाच्यमहाकाले घटवृत्तित्वाभावासम्भवात्। ननु इदानीं घटोऽस्तीत्यादिप्रतीतिविषयो महाकालः सत्त्वेऽपि शुद्धमहाकाल उक्तप्रतीतेरविषयः परं सौरक्रियारूपोपाधिविशेषपरिछिन्नमहाकाल एव तादृशप्रतीतिविषय इति प्राचीनैराक्षिप्यते चेन्मैवम्, सौरक्रियाविशिष्टमहाकालः इदानीं तदानीम् इत्यादिप्रतीतिविषय इति स्वीकारापेक्षया सौरक्रियारूपकालोपाधिरेव तादृशप्रतीतेर्विषयस्तस्य समीचीनत्वात्।

अपि च, प्राचामनुसारं कालो दिक् यथा विभुपदार्थः तद्वदीश्वरोऽपि। "प्राच्यां घटः प्रतीच्यां घटः" तथा "इदानीं घटोऽस्ति तदानीं घटो नासीत्" इत्यादिप्रतीत्यनुरोधेन व्यवहारानुरोधेन वा दिशः कालस्य स्वीकारे तादृशविनिगमनाविरहादीश्वरस्य विभुत्वेन तस्मादेव तादृशप्रतीत्युत्पत्तिसम्भवाद् अधिकपदार्थानस्वीकारेण लाघवाच्च दिशः कालस्य नातिरिक्तपदार्थत्वमिति रघुनाथशिरोमणेः अभिमतम्। तथाहि तेनोक्तं "दिक्कालौ नेश्वरादतिरिच्यते मानाभावात्। तत्तन्निमित्त-विशेषसमवधानवशादीश्वरादेव तत्तत्कार्य-विशेषाणामुपपत्तेः। परेषाम् एकैकस्माद्दिगादेः इव विलक्षणानां प्राच्यादिव्यवहाराणामिति"[4] इति। तथाहि प्राचीनैर्यद् दिक्कालयोरतिरिक्तत्वमङ्गीकृतं तन्न युक्तिसिद्धं तयोस्तदतिरिक्तत्वे मानाभावाद् इत्यर्थः। किञ्च, न चात्र दिक्त्वं पक्षतावच्छेदकीकृत्य अतिरिक्तत्वाभावसाधने सिद्ध्यसिद्धिभ्यां व्याघात इति वाच्यम्। प्राच्यां दिशि घट इति प्रतीतिविषयीभूतविभुत्वस्यैव दिक्त्वरूपत्वात्। न च कालत्वं पक्षतावच्छेदकीकृत्य अतिरिक्तत्वाभावसाधने तद्दोषतादवस्थ्यमिति वाच्यम्। इदानीं घटोऽस्ति तदानीं घटो नासीत् इति प्रतीतिविषयीभूतविभुत्वस्यैव कालत्वरूप-त्वात्। विभुत्वञ्च मूर्तेतरद्रव्यत्वं न तु परममहत्परिमाणरूपम्। ईश्वरात्मनि तस्य निराकरिष्यमाणत्वेन विभुत्वाभावापत्तेः। ननु दिक्कालयोरतिरिक्तत्वानभ्युपगमे पूर्वस्यां घट इदानीं घट इत्याद्यनुगतप्रतीत्यनुपपत्तिः, अपि चेश्वरादेव तथा प्रतीतिनिर्वाह इति न वाच्यम्, प्राच्यां घटः प्रतीच्यां घट इत्यादेरिदानीं घटस्तदानीं घट इत्यादेश्च वैलक्षण्यानु-पपत्तेरीश्वरस्यैकत्वादिति चेन्मैवं, तत्तन्निमित्तविशेषसमवधानवशात् तत्तत्कालो-पाधितत्तद्दिगुपाध्यवच्छिन्नात् तत्तत्कार्य-विशेषाणां प्राच्यां घटः इदानीं घट इत्यादिप्रतीतिसम्भवात्। कालस्य दिशः चैकत्वाद्यथा तत्तदुपाध्यवच्छिन्नाभ्यां ताभ्यामेव प्राच्यां घटः प्रतीच्यां घट इत्यादेरिदानीं तदानीं घट इत्यादेश्च वैलक्षण्यनिर्वाह इति कालदिशोरतिरिक्तत्वावादिन आक्षेपः कुर्वन्ति चेत्तत्रैवं प्रत्यवतिष्ठते आचार्यरघुनाथ-शिरोमणिः तत्तदुपाध्यवच्छिन्नादीश्वरादेव तादृशप्रतीतीनां वैलक्षण्यनिर्वाह इति। तदुक्तं तेन-- "तत्तन्निमित्तविशेषसमवधानवशादी-श्वरादेव तत्तत्कार्यविशेषाणामुपपत्तेः"[5] इति। एवं नैयायिकप्रवराचार्यरघुनाथशिरोमणिना दिक्कालयोः पदार्थातिरिक्तत्वं विविधयुक्त्या खण्डयित्वा तयोरीश्वरेऽन्तर्भावः कृतः।

**आकाशस्यापीश्वरेऽन्तर्भावः**

न्यायवैशेषिकदर्शने आकाशं द्रव्यान्यतमपदार्थविशेषम्। तच्चैकं विभु, विभुत्वाच्च नित्यम्। किञ्चाकाशत्वमेकव्यक्ति-मात्रवृत्तित्वान्न जातिः, तच्चाखण्डोपाधिः इत्यवमन्तव्यम्।

प्राचीनतन्त्रानुगुणं शब्दसमवायिकारण-पुरस्कारेण पृथिव्याद्यष्टद्रव्यातिरिक्ताकाश-रूपविलक्षणद्रव्यमाचार्यरघुनाथशिरोमणिना नाङ्गीकृतम्। यतो हि ईश्वरो जन्यमात्रं प्रति निमित्तकारणम्, शब्दस्य जन्यगुणत्वात् तत्प्रत्यपि निमित्तकारणमङ्गीकार्यम्। अत ईश्वरनिष्ठशब्दकारणता

---

3 सिद्धान्तलक्षणम्

4 पदार्थतत्त्वनिरूपणम्, पृष्ठा-३

5 पदार्थतत्त्वनिरूपणम्, पृष्ठा-३

उभयवादिसिद्धा , तेन चेश्वरो यथा शब्दस्य निमित्तकारणं तद्वत् समवायिकारणत्वमपि ईश्वरे कल्पनीयम्, आकाशस्य शब्दसमवायिकारणत्वे मानाभावात्। तदुक्तं रघुनाथेन "शब्दनिमित्त-कारणत्वेन क्लृप्तस्येश्वरस्यैव शब्दसमवायि-कारणत्वम्"[6] इति।

प्राचीना यद्येवं ब्रूयुर्यद् ईश्वरो यथा चेतनस्वरूपवद् विभुपदार्थस्तद्वज्जीवात्मापि, अतो जीवात्मैव शब्दसमवायिकारणं भवतु इति चेन्न , गौरवात्। तथाहि जीवात्मा यदि शब्दसमवायिकारणं स्यात्तदा तत्र समवायित्वं कारणत्वञ्चोभयमेव कल्पनीयम्। परमीश्वरे तु कारणता प्रागेवोभयवादिसिद्धा, तत्र केवलं समवायित्वकल्पनानिबन्धेन लाघवाद् ईश्वरे एव शब्दसमवायिकारणत्वं सिद्धम्। तदुक्तं श्रीरघुदेवन्यायालङ्कारेण पदार्थतत्त्वनिरूपणस्य टीकायां-- "जन्यमात्रं प्रतीश्वरस्य कारणतायाः क्लृप्तत्वात्तत्र समवायित्वमात्रकल्पनमेवेश्वरस्य शब्दसमवायित्वे विनिगमकं जीवानां तथात्वे कारणत्वसमवायित्वयोर्द्वयोः कल्पने गौरवादिति भावः"[7] इति।

प्राच्यैर्यद्युच्यते यददृष्टो यथा जन्यमात्रं प्रति निमित्तकारणं भवति तद्वत् शब्दं प्रत्यपि। ततश्च यो धर्मो यस्य कार्यस्य जनको भवति, तद्धर्माश्रयधर्मी अपि तत्कार्यजनको भवतीति व्याप्तिबलेन शब्दो जीवजन्यो जीवादृष्टजन्यत्वात् सुखवदित्याद्य-नुमानसम्भवादिति चेन्न विनिगमनाविरहात्। तदुक्तं रघुनाथेन "शब्दस्तज्जन्यस्तदृष्ट-जन्यत्वात् सुखादिवदिति पुनरप्रयोजकम्। अदृष्टस्य शब्दजनकत्वेऽपि तदाश्रयस्य जनकत्वे मानाभावात्"[8] इति।

किञ्चात्रावधेयं यत् शब्दो यदि जीवात्मनो गुणरूपेण स्वीक्रियते तदा जीवसमवेतानां ज्ञान-सुख-दुःखेच्छाप्रयत्न-गुणसमूहानाम् "अहं जानामि", "अहं सुखी", "अहं दुःखी", "अहमिच्छामि", "अहं करोमि" इत्याकारतया यथा मानसप्रत्यक्षो भवति तद्वद् "अहं शब्दवान्" इत्यपि मानसप्रत्यक्षः स्यादित्यसम्भवम्। अतः शब्द ईश्वरगुण इति स्वीकार्यं समीचीनत्वात्।

यदि प्राच्यैरुच्यते ईश्वरो यदि शब्दसमवायिकारणं स्यात्तदा श्रवणेन्द्रियस्य का कथा, यत आकाशस्यातिरिक्तद्रव्य-त्ववादिप्राचीननये कर्णशष्कुलीविवरावच्छिन्ना-काशस्य श्रवणेन्द्रियत्वात्? तदेदमुत्तरं प्रत्युत्तरितम् आचार्यरघुनाथेन नित्यं विभु आकाशं यद्युपाधिविशेषेणावच्छिन्नं सत् श्रवणेन्द्रियरूपेण गृहीतं स्यात्तदा कथं ईश्वरोऽपि कर्णशष्कुलीविवरावच्छिन्नेन श्रवणेन्द्रियरूपेण गृहीतो न स्यात्, तस्यापि नित्यत्वात् विभुत्वाच्च? अतः शब्दोऽपि ज्ञानादिवदीश्वरसमवेत एव। तदुक्तं तेन "श्रोत्रमपि कर्णशष्कुलीविवरावच्छिन्न ईश्वर एव, यथा परेषां तथाविधमाकाशम्"[9] इति।

## वैमत्यम्

रघुनाथस्य सिद्धान्तस्यास्य **वैमत्यमपि** दृश्यते। तथाहि प्राचीनमतमनुसृत्य वक्तुमलं यन्न्यायवैशेषिकराद्धान्ते परमेश्वरे ज्ञानेच्छाकृतय इति विशेषगुणत्रयमङ्गीकृतम्। तेषाञ्च शाश्वतत्वान्नित्यत्वमभ्युपेयम्। तेन चेश्वरे शब्दः विशेषगुणतया स्वीक्रियते चेत्तदा तस्यापि नित्यत्वमङ्गीकार्यम्, "ये ये ईश्वरसमवेता विशेषगुणास्ते ते नित्याः, यथा नित्यज्ञानादयः" इति व्याप्तिबलेन ईश्वरसमवेतत्वं हेतुरूपेण स्वीकृत्य शब्दस्य नित्यत्वसाधनात्। परमाचार्यरघुनाथेन किं शब्दस्य नित्यत्वं स्वीक्रियते इति प्रश्नः। परन्तु न्यायसूत्रेण विविधैर्हेतुभिर्युक्तिभिश्च शब्दस्य अनित्यत्वं व्यवस्थापितम्। वैशेषिकतन्त्रमपि समानमेवावगाहते। तदुक्तमुपस्कारे-- "नित्यवैधर्म्यात्"[10] इति , "अनित्यश्चायं कारणतः"[11] इति च।

### विशेषपदार्थखण्डनम्

नव्यन्यायवैशेषिकसम्मतसप्तपदार्थेषु विशेषोऽन्यतमः। "धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रे- यसम्"[12] इति वैशेषिकसूत्रे द्रव्यादिवत् विषेषोऽपि पृथक्पदार्थः स्वीकृतः। न्यायदर्शने विशेषपदार्थस्योद्दिष्टाभावेऽपि भाष्यवचनाज्ज्ञायते समानतन्त्रवैशेषिकदर्शन- स्वीकृतविशेषपदार्थो महर्षिगौतमस्याभीष्ट इति। तदुक्तं भाष्यकारवात्स्यायनेन "अस्त्यन्यदपि द्रव्यगुणकर्मसामान्यविशेष- समवायाः प्रमेयम्"[13] इति।

पदार्थोऽयं नित्यद्रव्यवृत्तिस्तथाश्रय-भेदेऽनन्ताः। अत्र नित्यपदेन पृथिव्यप्तेजोवायूनां परमाणवस्तथा आकाशकालदिगात्ममनसां ग्रहणम्।

तल्लक्षणञ्च प्रथमतो भणितं तर्कसंग्रहेऽन्नंभट्टेन "नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव"[14] इति। ततः परमुक्तं "नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः"[15] इति। अत्र नित्यद्रव्यवृत्तय इत्येव विशेषस्य लक्षणम्।

### खण्डनम्

आचार्यरघुनाथस्तु स्वतोव्यावर्तकत्वेन अतिरिक्तपदार्थरूपेण विशेषो नाङ्गीकुरुते। तन्नये व्यावर्तकधर्मरूपेण यद्विशेषपदार्थस्य कल्पना भवति तद्धि नित्यद्रव्येष्वपि भवितुमर्हति तेषामपि स्वतोव्यार्वतकत्वात् विशेषपदार्थस्वीकृतौ तादृशविनिगमनाभावच्च। तदुक्तं रघुनाथेन "विशेषोऽपि न पदार्थान्तरं मानाभावात्। विनापि व्यावर्तकं धर्मं परेषां विशेषाणामिव नित्यानां द्रव्याणामपि स्वत एव व्यावर्तकत्वात्।"[16] इति।

अत्र चेदमुच्यते प्रशस्तपादाचार्येण यद् यद्यपि नित्यद्रव्यवृत्तिविशेषपदार्थः अस्मत्प्रत्यक्षगोचरस्तथापि योगिनां नित्यपरमाण्वाकाशादिवद् विशेषस्यापि प्रत्यक्षसिद्धत्वाद् विशेषः स्वीकार्यः इति। अत्रैवं प्रत्यवतिष्ठते आचार्यरघुनाथः तर्हि तानेव योगिजनान् पृच्छतु यत्तैः पञ्चभावपदार्थातिरिक्तविशेष- पदार्थः प्रत्यक्षीक्रियते ना वा? अत्रेदं तात्पर्यं यद् विशेषपदार्थो न योगिगणप्रत्यक्षसिद्धो मानाभावात्। तदुक्तं रघुनाथशिरोमणिना

---

[6] पदार्थतत्त्वनिरूपणम्, पृष्ठा-५

[7] श्रीरघुदेवन्यायालङ्कारकृता पदार्थतत्त्वनिरूपणटीका, पृष्ठा- ८०

[8] पदार्थतत्त्वनिरूपणम्, पृष्ठा-५

[9] पदार्थतत्त्वनिरूपणम्, पृष्ठा-५

[10] वैशेषिकसूत्रोपस्कारः

[11] वैशेषिकसूत्रोपस्कारः

[12] वैशेषिकसूत्रम्-४

[13] न्यायसूत्रवात्स्यायनभाष्यम्

[14] तर्कसंग्रहः, दीपिकाटीका

[15] तर्कसंग्रहः, दीपिकाटीका

[16] पदार्थतत्त्वनिरूपणम्, पृष्ठा-२०

ISSN : 2583-2271
Vol. - I, No. 1: 2021

"योगिनोऽतिरिक्तं विशेषमीक्षन्ते। एवं तर्हि त एव सशपथं पृच्छयन्तां किमेतेऽतिरिक्तं विशेषमीक्षन्ते न वेति"[17] इति।

**उपसंहृतिः**

बङ्गन्यायसम्प्रदायप्रवर्तकाचार्यरघुनाथशिरोमणिर्न केवलं 'तत्त्वचिन्तामणिः' इति ग्रन्थाध्ययनेन भावनया च तत्त्वानुसन्धानपूर्वकतया दीधितिटीकां विरच्याखिलभारतवर्षे स्वसम्प्रदायं प्रतिष्ठाप्य परिश्रान्तो बभूव अपि तु वैशेषिकदर्शनस्य सूत्रादारभ्य भाष्ये, वार्तिकम् इति न्यायप्रस्थाने, किरणावली न्यायलीलावती इति वैशेषिकप्रस्थानेऽपि तस्य कीर्तिर्ज्योतिष्कायते। तस्य 'पदार्थतत्त्वनिरूपणम्' इति कीर्तिस्तु नव्यन्यायवैशेषिकाचार्यैः सादरं समाद्रियते। अत्र रघुनाथस्य स्वकीयत्वं तथा स्वसयुक्तिकचिन्तनं विस्पष्टं परिस्फुटम्। तेन सदृढयुक्तिभिर्ये सिद्धान्ताः प्रतिष्ठापितास्तत्र न केवलं न्यायवैशेषिकमतमनुसृतमपि तु प्राभाकर-भाट्टमीमांसाद्वैतवेदान्तादीनामपि मतान्यनुसृतानि। अतोऽत्र कुत्रचिन्न्यायवैशेषिकस्वीकृतपदार्थाः खण्डिताः, कुत्रचिच्च प्राभाकरभाट्टमीमांसादितन्त्रसिद्ध- पदार्था अपि स्वीकृताः इति शिवम्।

---

[17] पदार्थतत्त्वनिरूपणम्, पृष्ठा-२०

ISSN : 2583-2271
Vol. - I, No. 1: 2021

## सहायकग्रन्थाः


- रघुनाथः, *पदार्थतत्त्वनिरूपणम्* ; सम्पा०मधुसूदनन्यायाचार्यः, संस्कृतकलेज् , कोलकाता,१९७३।
- गौतमः, *न्यायदर्शनम्*, वात्स्यायनभाष्य-सहितम्, उद्योतकरवार्तिक-सहितम्, विश्वनाथवृत्तिसहितञ्च, सम्पा॰ तारानाथन्यायतर्कतीर्थः, अमरेन्द्रमोहन-तर्कतीर्थः, मुन्सीराममनोहरलालपाव्लिशार्स् प्राइभेट् लिमिटेड, नवदेहली, कलिकातासंस्कृतसिरीज नं -XVIII, द्वितीयसंस्करणम्, १९८५।
- न्यायपञ्चाननः, विश्वनाथः, *कारिकावली* (मुक्तावली-दिनकरी-रामरुद्रीसमेता) ; सम्पा॰ हरिरामशुक्लः, चौखम्बा संस्कृत सीरिज आफिस, बनारस, १९५१।
- भट्टः, जयन्तः; *न्यायमञ्जरी* (खण्डः१-३) ; चक्रधररचितग्रन्थिभङ्ग-टीकासहिता, सम्पा॰ गौरीनाथशास्त्री, संपूर्णानन्दसंस्कृतविश्वविद्यालयः , वाराणसी, प्रथमसंस्करणम्, १९८२।
- उपाध्याय, गङ्गेश, तत्त्वचिन्तामणि (प्रमालक्षण) ; सम्पा॰ श्रीविश्वबन्धु भट्टाचार्य, प्रका॰ स्वामी प्रभानन्द, रामकृष्ण मिशन् इन्स्टिटिउट् अव कालचार, कोलकाता, मार्च २०००।
- उपाध्याय, गङ्गेश, तत्त्वचिन्तामणि (व्याप्तिपञ्चक) ; सम्पा. श्रीयुक्त राजेन्द्रनाथ घोष, पश्चिमवङ्ग राज्य पुस्तक पर्षत्, कलकाता- ७०००१३, द्वितीयमुद्रणम्, २०११।
- उदयनाचार्यप्रणीता, न्यायकुसुमाञ्जलिः; पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, कोलकाता, १९९५।
- ताताचार्यः, एन.एस. रामानुजः, *शाब्दबोधमीमांसा* (१-४) ; इन्स्टिट्युट् फ्रेञ्च डि पाण्डिचेरी, राष्ट्रिसंस्कृतसंस्थानम्, नवदेहली, प्रथमसंस्करणम् ,२००५।
- अन्नंभट्टः, *तर्कसंग्रहः* ; सम्पा० नारायणचन्द्रगोस्वामी, संस्कृतपुस्तकभाण्डारः, कोलकाता,१४१३ बङ्गाब्दः।
- विश्वनाथन्यायपञ्चाननः, कारिकावली ; सम्पा० नारायणसूनु, राष्ट्रीयसंस्कृतसंस्थानम्, दिल्ली, २००२।